This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

८८१

पु.५५

पु ३७

॥ बृहज्जातकप्रारंभः ।

॥श्रीगणेशायनमः॥

॥श्रीमत्कमललोचनायनमः॥

Acc. No. ~~1379~~ M.1742
Title - बृहज्जातक.
Author - वराहमिहिर.
Date - A.D. 1622.
Sub - ज्योतिष्य.
folio - 37
Xerox - 73

KKSU LIBRARY
RAMTEK
441 106
M.1742
Dist. Nagpur

Checked 2012



श्रीगणेशायनमः ॥ श्रीदेवचामुंडायैनमः ॥ श्रीसरस्वत्यैनमः ॥ मूर्तित्वेपरिकल्पितःशशभृतोवर्त्मापुनर्जन्म
नामात्मेत्यात्मविदांक्रतुश्चयजतांभर्तामरज्योतिषां ॥ लोकानांप्रलयोद्भवस्थितिविभुश्चानेकधायःश्रुतौवा
चंनःसददात्वनेककिरणस्त्रैलोक्यदीपोरविः ॥१॥ भूयोभिःपटुबुद्धिभिःपटुधियांहोराफलज्ञप्तयेश
ब्दन्यायसमंचितेषुबहुशःशास्त्रेषुदृष्टेष्वपि ॥ होरातंत्रमहार्णवप्रतरणेभग्नोद्यमानामहंस्व १
ल्पंवृत्तविचित्रमर्थबहुलंशास्त्रप्लवंप्रारभे ॥२॥ होरेत्यहोरात्रविकल्पमेकेवांछंतिपूर्वापरवर्ण
लोपात् ॥ कर्मार्जितंपूर्वभवेसदादियत्तस्यपक्तिंसमभिव्यनक्ति ॥३॥ कालांगानिवरांगमाननमुरो न४
हृत्क्रोडवासोभृतोवस्तिर्व्यंजनमूरुजानुयुगलेजंघेततोंघ्रिद्वयं ॥ मेषाश्विप्रथमान[illegible]र्क्षचरणा
श्चक्रस्थिताराशयोराशिक्षेत्रगृहर्क्षभानिभवनंचैकार्थसंप्रत्ययाः ॥४॥ मत्स्यौघटीनृमिथुनंस
गदंसवीणंचापीनरोश्वजघनोमकरोमृगास्यः ॥ तौलीससस्यदहनाप्लवगाचकन्याशेषाःस्वनामसदृशाः

स्वचरास्यु सर्वे ॥५॥ क्षितिजसितज्ञचंद्ररविसौम्यसितावनिजाः सुरगुरुमंदसौरिगुरवश्च गृहांशक
पाः ॥ अजमृगतौलिचंद्रजवनादि नवांशविधिर्ज्ञवनसमांशकाधिपतयः स्वगृहात्क्रमशः ॥६॥
ओजरविज्ञगुरुज्ञशुक्रभागाः पवन ५ समीरण ५ कौर्प्य ८ जूक ७ लेयाः ५ ॥ अयुजियुजि च तेवि (उ
पर्ययस्थाः शशिजवनालिझषाणां तमृक्षसंधिः ॥७॥ क्रियतावुरिजितुमकुलीरलेयपार्थोनजूक
कौर्प्याख्याः ॥ तौक्षिक आकोकेरो हृद्रोगश्चौत्य त्रैचक्रं ॥८॥ द्रेक्काण होरानवभागसंज्ञास्त्रि
शांशकद्वादशसंज्ञिताश्च ॥ क्षेत्रं च यद्यस्य स तस्य वर्गो होरेति लग्नं जवनस्य चार्द्धं ॥९॥ गो२जा१
श्विकर्किमिथुनाः समृगा निशाख्याः पृष्ठोदया विमिथुनाः कथितास्त एव ॥ शीर्षोदया दिन
बलाश्च भवंति शेषा लग्नं समेत्युभयतः पृथुरोमयुग्मं ॥१०॥ क्रूरः सौम्यः पुरुषवनिते ते चरा
गद्विदेहाः प्रागादीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः ॥ मार्त्तंडेंद्वोरयुजि समभे चंद्रभान्वो

श्वहोरेद्रेक्काणाः स्युः स्वतनवसुत त्रित्रिकोणाधिपानां ॥११॥ केचित्तु होरां प्रथमांशपस्य वांछंति
लाभाधिपतेर्द्वितीयां ॥ द्रेक्काणसंज्ञामपि वर्णयंति स्वद्वादशैकादशराशिपानां ॥१२॥ अजवृषभ
मृगांगनाकुळीराझषवणिजोच दिवाकरादितुंगाः ॥ दश१० शिखि३ मनुयुक्२८ तिथी१५ द्वि
पं५ त्रैस्त्रिनवक२७ विंशतिभिश्च तेस्तनीचाः ॥१३॥ वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यंत
गाः शुभफलानवभागसंज्ञाः ॥ सिंहोवृषः प्रथमषष्ठहयांगतौळिकुंभास्त्रिकोणभवनानिभ
वंति सूर्यात् ॥१४॥ होरादयस्तनुकुटुंबसहोत्थबंधुपुत्रारिपत्निमरणानि शुभास्पदायाः
रिःफाख्यमित्यपचयान्यरि कर्मलाभदुश्चिक्यसंज्ञकगृहाणि ननित्यमेके ॥१५॥ कल्य। स्व। वि
क्रम। गृह। प्रतिभा। क्षतानि। चित्तोत्थ। रंध्र। गुरु। मान। भव। व्ययानि ॥ लग्नाच्चतुर्थनिधने चतुर
स्रसंज्ञे द्यूनं च सप्तमगृहं दशमर्क्षमाज्ञा ॥१६॥ कंटककेंद्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थख

भर्ते १

२

म.३ ४

मानी॥ तेषु यथाभिहितेषु बलाढ्याः कीटनरांबुचराः पशवश्च ॥१७॥ केंद्रात्परं पणफरं परतश्च सर्वमा
पोक्लिमं हिबुकमंबु सुखं च वेश्म ॥ जामित्रमस्तभवनं सुतमत्र त्रिकोणं मेषूरणं दशममत्र च कर्मवि
द्यात् ॥१८॥ होरास्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटाः केंद्रस्था द्विपदादयो ह्नि निशि च प्रा
त्ते च संध्याद्वये ॥ पूर्वार्धे विषयादयः कृतगुणाः २०।२४।२८।३२।३६।४० मानं प्रतीपं च तद्दृष्क्यी सद्
ङीनपश्च नवमं त्वाद्यं त्रिकोणी चयत् ॥१९॥ रक्तः श्वेतः शुकतनुनिभः पाटलो धूम्रपांडु चित्रः कृष्णः
कनकसदृक्षाः पिंगलः कर्बुरश्च ॥ बभ्रुः स्वच्छः प्रथमभवनाद्येषु वर्णाः प्लवत्वं स्वाम्याशाख्यं दि
नकरयुताद्वा द्वितीयं च वेशिः ॥२०॥ ॥ इति श्रीआवंतिकाचार्यवराहमिहिरकृते लघुजातके रा
शिप्रभेदो नाम प्रथमोध्यायः ॥ ॥ कालात्मा दिनकृन्मनस्तु हिनगुः सत्वं कुजो ज्ञो वचो जीवो ज्ञानसु
खे सितश्च मदनो दुःखं दिनेशात्मजः ॥ राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः सूरिर्दा

5

नवह्रजितश्च सचिवो द्रेष्यः सहस्त्रीभुजः ॥१॥ हेलिः सूर्यश्चंद्रमाः शीतरश्मिर्हेम्नो विज्ञो बोधनश्चंद्रपु
त्रः ॥ आरो वक्रः क्रूरदृक्चावनेयः कोणो मंदः सूर्यपुत्रोसितश्च ॥२॥ जीवो गिरांसुरगुरुर्वचसांपती
ज्यो शुक्रो भृगुर्भृगुसुतः सित आस्फुजिच्च ॥ राहुस्तमोगुरसुरश्च शिखीति केतुः पर्यायमन्यमु
पलभ्य वदेच्च लोकात् ॥३॥ रक्तः श्यामो भास्करो गौर इंदुर्नात्युच्चांगो रक्तगौरश्च वक्रः ॥ दूर्वाश्या
मो ज्ञो गुरु गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः ॥४॥ वर्णास्तांम्रसितातिरक्तहरितव्या
पीतचित्रासिता वह्न्यंब्वग्निजकेशवेंद्रशचिकाः सूर्यादिनाथाः क्रमात् ॥ प्रागाद्या रविशुक्र
लोहिततमःसौरींदुवित्सूरयः क्षीणेंद्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः ॥५॥ बुधसूर्यसु
तौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः ॥ शिखिभूखपयोमरुद्गणानां वशिनो भूमिसु
तादयः क्रमेण ॥६॥ विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोंत्यजानां ॥ चंद्रार्कजीवा

पनाणी१

ज्ञसितौ कुजार्की यथाक्रमं सत्वरजस्तमांसि ॥७॥ मधुपिंगलदृक् चतुरस्रतनुः पित्तप्रकृतिः सविताल्पकचः ॥
तनुवृत्ततनुर्बहुवातकफः प्राज्ञश्च शशी मृदुवाक् शुभदृक् ॥८॥ क्रूरदृक् तरुणमूर्त्तिरुदारः पैत्तिकः सुच
पलः कृशमध्यः श्लिष्टवाक् सततहास्यरुचिर्ज्ञः पित्तमारुतकफप्रकृतिश्च ॥९॥ बृहत्तनुः पिंगलमूर्द्धजे
क्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः ॥ भृगुः सुखी कांतवपुः सुलोचनः कफानिलात्माऽसितवक्रमूर्द्ध
जः ॥१०॥ मंदोलसः कपिलदृक् कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचोनिलात्मा ॥ स्नाय्वस्थ्यसृ
क्त्वगथ शुक्रवसो समज्जा मंदार्कचंद्रबुधशुक्रसुरेज्यभौमाः ॥११॥ देवांब्वग्निविहारकोशशाय
नक्षित्युत्करेशाः क्रमाद्वस्त्रं स्थूलमभुक्तमग्निकहतं मध्यं दृढं पाटितं ॥ ताम्रं स्यान्मणिहेमयुक्तिर
जतान्यर्काच्च मुक्तायसी द्रेष्काणैः शिशिरादयः शस्तुऊरंज्ञग्वादिषूद्यत्सु वा ॥१२॥ त्रिदशत्रिकोणच
तुरस्रसप्तमान्यवलोकयंति चरणाभिवृद्धितः ॥ रविजामरेज्यरुधिराः परे च ये क्रमशो भवंति कि

लवीक्षणेधिकाः॥१३॥ अयनक्षणवासरर्त्तवो मासोर्द्धं च समाश्च भास्करात्॥ कटुकलवणतिक्तमिश्रिता
मधुराम्लौ च कषाय इत्यपि॥१४॥ जीवोजीवबुधौ सितेंदुतनयौ व्यर्काः विभौमाः क्रमाद्वींदुर्का विकुजें-
दुिनाश्च सुहृदः केषांचिदेवं मतं॥ सत्योक्ते सुहृदस्त्रिकोणभवनात्स्वात्स्वांत्यधीधर्मपाः स्वोच्चायुःसु-
खपाः स्वलक्षणविधिर्नान्यैर्विरोधादिति॥१५॥ शत्रू मंदसितौ समश्च शशिजो मित्राणि शेषा रवेस्ती-
क्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः॥ जीवेंदूष्णकराः कुजस्य सुहृदो ज्ञोरिः सितार्की
समौ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे॥१६॥ सूरेः सौम्यसितावरी रविसुतो मध्यो परे ४
त्वन्यथा सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी॥ शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य
चान्येरयो ये प्रोक्ताः सुहृदस्त्रिकोणभवनात्तेमी मयाकीर्तिताः॥१७॥ अन्योन्यस्य धनव्ययायसहजव्या-
पारबंधुस्थितास्तत्काले सुहृदः स्वतुंगभवनेप्येके रयस्त्वन्यथा॥ द्व्येकानुक्तभपान्सुहृत्सममरीन्सं

8

अयमंग विभागोभ्यां न इति प्रतीयते द्वादशधा निवेशाभावात् सारावली विरोधाच्च ॥ सारावल्यां तु ॥ मेषो मूर्धनि वृषभो
मुखगलयो रस ककुदे पादेषु ॥ मिथुनाख्यो दृष्टोरः पार्श्वे भुज कर्किटकोन्नेधरो ॥१॥ सिंहमृगो जघनं स्थपाक्षि मकर पा
स्थितौ युवतिचापौ ॥ ऊरुस्थितौ वृषप्रदेशौ स्फिक्युग्मजौ जानुके कौटीरौ च ॥२॥ मेषादिषु द्वादशधा कल्पिता तास्ते नाग चतुष्पदादीनां
वाशेषु मीन घट धर मकरा कामुक वृश्चिका नाम्ना ॥

चिंत्य नैसर्गिकीस्तत्काळतु पुनरुक्तानधि सुहृन्मित्रादिशिः कल्पयेत ॥१८॥ स्वोच्चसुहृत्स्वत्रिकोणनवांशैः स्था
नबळं स्वगृहोपगतैश्च ॥ दिक्षु बुधांगिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च ॥१९॥ उदगयने रविशीत
मयूखौ वक्रसमागमगाः परिशेषाः ॥ विपुळकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्याः ॥२०॥
निशि शशिकुजसौराः सर्वदाज्ञो ह्नि चान्ये बहुळसितगताः स्युः क्रूरसौम्याः क्रमेण ॥ द्व्ययनदिवसहोरा
मासपैः काळवीर्यं शकबुगुरुशुक्रकाद्या वृद्धितो वीर्यवंतः ॥२१॥ इति वराहमिहिरकृतौ बृहज्जातके ग्रहयोनि
भेदो नाम द्वितीयः ॥ ॥ क्रूरग्रहैः सुबलिभिर्विबलैश्च सौम्यैः क्लीबे चतुष्टयगते तदवेक्षणाद्वा ॥ चंद्रोपग
द्विरसभागसमानरूपं सत्वं वदेद्यदि भवेत्स वियोनिसंज्ञः ॥१॥ पापा बलिनः स्वभागगाः पारक्ये विबला
श्च शोभनाः ॥ लग्नं च वियोनिसंज्ञकं दृष्ट्वा चापि वियोनिमादिशेत् ॥२॥ क्रियः शिरो वक्त्रगळौ वृषोन्ये
पादांसकं पृष्ठमुरोथ पार्श्वे ॥ कुक्षिस्त्वपानोंध्रयमेढ्रमुष्कौ ॥ स्फिक्पुच्छमित्याह चतुष्पदांगे ॥३॥

वे
लग्नांशकाद्ग्रहयोगेक्षणाद्वावर्णान्वदेद्बळयुक्ताद्वियोनौ॥दृष्ट्यासमान्प्रवदेत्स्वसंख्ययारेखांवदेत्स्मर
संस्थैश्चपृष्ठे॥४॥खगेदृकाणेबळसंयुतेनवाग्रहेणयुक्तेचरभांशकोदये॥बुधांशकेवाविहगाःस्थ
ळांबुजाःशनैश्चरेंद्वीक्षणयोगसंभवाः॥५॥होरेंदुसूरिरविभिर्विबलैस्तृणानांतोयेस्थळेतरुभ
वोंशकृतःप्रभेदः॥लग्नाद्ग्रहःस्थळजळर्क्षपतिस्तुयावांस्तावंतएवतरवःस्थळतोयजाताः॥६॥अं
तःसारान्जनयतिरविर्दुर्भगान्सूर्यपुत्रःक्षीरोपेतांस्तुहिनकिरणःकंटकाढ्यांश्चभौमः॥वागीशज्ञौ
सफळविफलान्पुष्पवृक्षांश्चशुक्रःस्निग्धानिंदुःकटुकविटपान्भूमिपुत्रश्चभूयः॥७॥शुभोशुभर्क्षे ८
रुचिरंकुभूमिजंकरोतिवृक्षंविपरीतमन्यथा॥परांशकेयावतिविच्युतःस्वकात्भवंतितुल्यास्तरव
स्तथाविधाः॥८॥इतिश्रीबृहज्जातकेवियोनिजन्माध्यायोनामतृतीयः॥ ॥कुजेंदुहेतुप्रतिमासमार्त
वंगतेतुपीडर्क्षमनुष्णदीधितौ॥अतोन्यथास्थेशुभपुंग्रहेक्षितेनरेणसंयोगमुपैतिकामिनी॥ १॥
स्थे

यथास्तराशिर्मिथुनं समेति तथैव वाच्यो मिथुनप्रयोगः ॥ असद्ग्रहालोकितसंयुतेस्ते सरोषईर्षैः सविला
सहासः ॥२॥ रवींदुशुक्रावनिजैः स्वभागगैर्गुरौ त्रिकोणोदयसंस्थितेपि वा ॥ भवत्यपत्यं हि विबीजि
नामिमे करा हिमांशोर्विदृशामिवाफलाः ॥३॥ दिवाकरेंद्वोः स्मरगौ कुजार्कजौ गदप्रदौ पुंगवयोषि
वृ.४ तोस्तदा ॥ व्ययस्वगौ मृत्युकरौ युतौ तथा तदैकदृष्ट्या मरणाय कल्पितौ ॥४॥ दिवार्कशुक्रौ पितृमातृसं
ज्ञितौ शनैश्चरेंदू निशि तद्विपर्ययात् ॥ पितृव्यमातृष्वसृसंज्ञितौ च तावथौजयुग्मर्क्षगतौ तयोः शुभौ
॥५॥ अभिलषद्भिरुदयर्क्षमसद्भिर्मरणमेति शुभदृष्टिमयातैः ॥ उदयराशिसहिते च यमे स्त्री वि
गलितोडुपतिभूसुतदृष्टे ॥६॥ पापद्वयमध्यसंस्थितौ लग्नेंदू न च सौम्यवीक्षितौ ॥ युगपत्पृथगेव वा
वदेन्नारी गर्भयुता विपद्यते ॥७॥ क्रूरे शशिनश्चतुर्थगे लग्नाद्वा निधनाश्रिते कुजे ॥ बंधूंत्यगयोः कुजा
र्कयोः क्षीणेंदौ निधनाय पूर्ववत् ॥८॥ उदयास्तगयोः कुजार्कयोर्निधनं शस्त्रकृतं वदेत्तदा ॥ मासा

धिपैतौ निपीडितेन कालैस्स्वभं स्यादिशेत्॥९॥ शशांकलग्नोपगतैः शुभग्रहै स्त्रिकोणजायार्थसुखा
स्पदस्थितैः॥ तृतीयलाभर्क्षगतैश्च पापकैः सुखी सगर्भो रविणानिरीक्षिते॥१०॥ ओजर्क्षे पुरुषांश
केषु बलिभिर्लग्नार्कगुर्विंदुभिः पुंजन्म प्रवदेत्समांशकगतैर्युग्मेषु तैर्योषिता॥ गुर्वर्कौ विषमेनरं
शशिसितौ वक्रश्च युग्मे स्त्रियं द्व्यंगस्था बुधवीक्षणाच्च यमलौ कुर्वंति पक्षे स्वके॥११॥ विहायलग्नं विष
मर्क्षसंस्थः सौरोपि पुंजन्मकरो विलग्नात्॥ प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यः प्रसूतौ पुरुषोंगना वा॥१२॥
अन्योन्यं यदि पश्यतः शशिरवी यद्यार्किसौम्यावपि वक्रो वा समगं दिनेशमसमे चंद्रोदयौ चेत्स्थितौ॥
युग्मौजर्क्षगतावपींदुशशिजौ भूम्यात्मजेनेक्षितौ पुंभागे सितलग्नशीतकिरणाः षट् क्लीबयोगाः
स्मृताः॥१३॥ युग्मे चंद्रसितौ तथौजभवने स्युर्ज्ञारिजीवोदया लग्नेंदू नृनिरीक्षितौ च समगौ
युग्मेषु वा प्राणिनः॥ कुर्युस्ते मिथुनं ग्रहोदयगतान् द्व्यंशांशकान् पश्यति स्वांशे ज्ञे त्रितयं ज्ञगांश

६

12

कवशाद्यकर्मैल्प मिश्रैः समं ॥१४॥ धनुर्धरस्यांत्यगते विलग्ने ग्रहैस्तदुच्चोपगतैर्बलिष्ठैः ॥ [illegible]नार्किणा वीर्ययु-
तेन दृष्टे संति प्रसूता अपि कोशसंस्थाः ॥१५॥ कुळल घनौकराश्छि चर्मी गज चेतनगः सितकुजजीवसू-
र्यचंद्रार्किबुधाः पुरतः ॥ उदयपचंद्रसूर्यनाथाः क्रमशो गदिता भवति शुभाशुभं मासाधिपतेः सदृश ॥१६॥
त्रिकोणगेहे विबलैस्ततापरैर्गुरौ बलिष्ठे द्विगुणस्तदा भवेत् ॥ अवागवीदावष्ठीनै र्न संधितेः शुभेक्षि-
तश्चेदस्ते गिरं चिरात् ॥१७॥ सौम्यद्वयं वीरविजराशिगौ चेत्सदुतो न जातः कुजः स्वकेशाभिनतु गमि
द्भास्करैयदृष्टे ॥ पंगुर्नीनेयम राशिकुजे वीक्षिते लग्नसंस्थे संघौ पापैः शशिनि च जडः स्यान्न चेत्सौम्य-
दृष्टः ॥१८॥ सौरेनाशीक दिवाकरदृष्टे वामनको मकरेस्य विलग्ने ॥ धीनवमोदयगेश्च दकाणे पाप-
युते रकुजो विशिराः स्यात् ॥१९॥ रविशशियुते सिंहलग्ने कुजार्कि निरीक्षिते नयनरहितः सौम्या-
सौम्यैः सबुद्बुदलोचनः ॥ व्ययगृहगतश्चंद्रो वामं दिनस्यपरं रविस्त्वशुभगदितायोगा याप्याश्च सर्वे

13

लिग्ने स्थिते ॥२०॥ तत्काळमिंदुसहितो द्विरसांशको यस्तत्तुल्यराशिसहिते पुरतः शशांके ॥ यावानुदेति दि
नरात्रिसमानभागस्तावद्गते दिननिशोः प्रवदंति जन्म ॥२१॥ उदयति मृदुभांशे सप्तमस्थे च मंदे यदि
भवति निषेकः सूतिरब्दत्रयेण ॥ शशिनि तु विधिरेष द्वादशेब्दे प्रकुर्यान्निगदितमिह चिंत्यं सूति
काले पि युक्त्या ॥२२॥ ॥इति श्रीबृहज्जातके निषेकाध्यायश्चतुर्थः ॥ ॥पितुर्जातः परोक्षस्य लग्नमिंदाव
पश्यति ॥ विदेशस्थस्य चरभे मध्याद्भ्रष्टे दिवाकरे ॥१॥ उदयस्थेपि वा मंदे कुजे वाऽस्तं समागते ॥
४ ×युग्मं× स्थिते वांतः क्षपानाथे शशांकसुतशुक्रयोः ॥२॥ शशांके पापलग्ने वा वृश्चिकेशत्रिभागगे ॥ शुभैः स्वाय
स्थितैर्जातः सर्पस्तद्वेष्टितोपि वा ॥३॥ चतुष्पदगते भानौ शेषैर्वीर्यसमन्वितैः ॥ द्वितनुस्थैश्च यमलौ भ
वतः कोशवेष्टितौ ॥४॥ छागसिंहवृषे लग्ने तत्स्थे सौरेथवा कुजे ॥ राश्यंशसदृशे गात्रे जायते नाळवे ७
ष्टितः ॥५॥ नलग्नमिंदुं च गुरुर्निरीक्षते न वा शशांकं रविणा समागतं ॥ सपापकोर्केण युतोथवा शशी

परेणजाते प्रवदंति निश्चयात् ॥६॥ क्रूरर्क्षगतावशोभनौ सूर्याद्यूननवात्मजस्थितौ ॥ बद्धस्तु पिता विदेशगः स्ववा
राशिवशाद्वा पथि ॥७॥ पूर्णे शशिनि स्वराशिगे सौम्ये लग्नगते श्च सुखे ॥ लग्ने जलजेस्तगेपि वा चंद्रे पोत
गता प्रसूयते ॥८॥ आप्योदयमाप्यगः शशी संपूर्णः समवेक्षतेऽथवा ॥ मेषूरणबंधुलग्नगः स्यात्सूतिः सलिले
न संशयः ॥९॥ उदयोडुपयोर्व्ययस्थिते गुप्त्यां पापनिरीक्षिते यमे ॥ अलिकर्किंयुते विलग्नगे सौरे शीतकरेक्षितेवटे
॥१०॥ मंदे कुगते विलग्नगे बुधसूर्येंदुनिरीक्षिते क्रमात् ॥ क्रीडालवने सुरालये सोखरभूमिषु च प्रसूयते ॥११॥
नृलग्नगं प्रेक्ष्य कुजः श्मशाने रम्ये सितेंदू गुरुरग्निहोत्रे ॥ रविर्नरेंद्रामरगोकुलेषु शिल्पालये ज्ञः प्रसवं करो
ति ॥१२॥ राश्यंशसमानगोचरे मार्गे जन्म चरे स्थिरे गृहे ॥ स्वर्क्षांशगते स्वमंदिरे बलयोगात्फलमंशकर्क्षयोः ॥१३॥
आरार्कजयोस्त्रिकोणगे चंद्रे स्यच विसृज्यते बया ॥ दृष्टेमरराजमंत्रिणा दीर्घायुः सुखवांश्च स स्मृतः ॥१४॥ पापेक्षि
ते तुहिनगावुदये कुजे स्ते त्यक्तो विनश्यति कुजार्कजयोस्तथाये ॥ सौम्ये पि पश्यति तथाविधहस्तमेति सौम्ये

गर्भायो ४

बृ १

नयेपिपरदृस्तागतोप्यनायुः॥१५॥पितृमातृगृहेषुतद्बलात्तरुशालादिषुनीचगैःशुभैः॥यदिनैकगतैस्तुवी
क्षितौलग्नेंदूविजनेप्रसूयते॥१६॥मंदर्क्षांशेशशिनिहिबुकेमंददृष्टेब्जगेवातद्युक्तेवातमसिशयनंनी
चसंस्थैश्चभूमौ॥यद्वद्राशिर्व्रजतिहरिजंगर्भमोक्षस्तुतद्वत्पापैश्चंद्रस्मरसुखगतैःक्लेशमाहुर्जनन्याः॥१७॥
स्नेहःशशितोदयात्तुवर्तिर्दीपोर्कयुक्तर्क्षवशाच्चराद्यैः॥द्वारंचतद्वास्तुनिकेंद्रसंस्थैर्ज्ञेयंग्रहैर्वीर्यस
मन्वितैर्वा॥१८॥जीर्णंसंस्कृतमर्कजेक्षितिसुतेदग्धंनवंशीतगौकाष्ठाढ्यंनदृढंरवौशशिसुतेनैकशिल्प्यु
द्भवं॥रम्यंचित्रयुतंनवंचभृगुजेजीवेदृढंमंदिरंचक्रस्थैश्चयथोपदेशरचनांसामंतपूर्वांवदेत्॥१९॥मेष
कुलीरतुलालिघटैःप्रागुत्तरतोगुरुसौम्यगृहेषु॥पश्चिमतश्चवृषेणनिवासोदक्षिणभागकरौमृगसिंहौ
॥२०॥प्राच्यादिगृहेक्रियादयोद्वौद्वौकोणगताद्विमूर्तयः॥शय्यास्वपिवास्तुवद्वदेत्पादैःषट्त्रिनवांत्यसं
स्थितैः॥२१॥चंद्रलग्नांतरगतैर्गृहैःस्युरुपसूतिकाः॥बहिरंतश्चचक्रार्द्धेदृश्यादृश्येन्यथापरे॥२२॥लग्न

उदिते लग्ने दितद्रेष्काणवद्रेष्काणादृगाननं

४ = स्वराशौ स्वनवांशे स्थितः स्थिरराशौ स्थिरांशे स्थितो वा सतो स्थे = वमांशं सस्यं मदक्षय भागेषु भागेषु ज्ञातव्यं

= कृष्णमरुत्तिलल क्ष्मादि वा करोति। योगद्वयान्यथाभावे आगंतुकं = ३

नवांशपतुल्य तनुः स्याद्वीर्ययुतग्रहतुल्य तनुर्वा। चंद्रसमेतनवांशपवर्णः कादिविलग्नविभक्तगात्रः॥२३॥

कं दृक् श्रोत्र नसा कपोल हनवो वक्त्रं च होरादयस्ते कंठांसक बाहु पार्श्वहृदय क्रोडानि नाभिस्ततः॥ बस्ति

लिंगगुदे ततश्च वृषणा ऊरू ततो जानुनी जंघांघ्रीत्युभयत्र वाममुदितैर्द्रेकाण भागैस्त्रिधा॥२४॥ तस्मिन्पाप

युते व्रणः शुभयुते दृष्टे लक्ष्मादिशेत् स्वर्क्षांशे स्थिरसंयुते च सहजः स्यादन्यथागंतुकः॥ मंदेश्मानिलजोग्निश

स्त्रविषजो भौमे बुधे भूभवः सूर्ये काष्टचतुष्पदेन हिमगौ शृंग्यब्जजोन्यैः शुभं॥२५॥ समनुपतिता यस्मिन्भा

गे त्रयः सबुधा ग्रहा भवति नियमात्तस्यावाप्तिः शुभेष्वशुभेषु वा॥ व्रणकृदशुभः षष्ठे देहे तनोर्भसमाश्रि

ते तिलकमसकृद्दृष्टः सौम्यैर्युतश्च स लक्ष्मवान्॥२६॥ ॥ इति बृहज्जातके सूतिकाध्यायः॥ ॥ संध्यायां हिम

दीधिति होरा पापैर्भांतगते मरणाय॥ प्रत्येकं शशिपापसमेतैः केंद्रैः स विनाशमुपेति॥१॥ चक्रस्य पूर्वापर

भागगेषु क्रूरेषु सौम्येषु च कीटलग्ने॥ क्षिप्रं विनाशं समुपैति जातः पापैर्विलग्नास्तमयाभितश्च॥२॥ पापा

दे ९

बुदयास्तगतौ क्रूरेण युतश्च शशी ।। दृष्टश्च शुभैर्न्न यदा मृत्युश्च भवेदचिरात ।। क्षीणे हिमगौ व्ययगे पा-
पैरुदयाष्टमगे ।। ३ ।। केंद्रेषु शुभाश्च न चेत् क्षिप्रं निधनं प्रवदेत ।। ४ ।। क्रूरसंयुतः शशी स्मरान्त्यमृत्यु-
लग्नगः ।। कंटकाद्बहिः शुभैरवीक्षितश्च मृत्युदः ।। ५ ।। शशिन्यरिविनाशगे निधनमाशु पापेक्षिते
शुभैरथ समाष्टकं दलमतश्च मिश्रैः स्थितिः ।। असद्भिरवलोकिते बलिभिरत्र मासं कळत्रसहि- शुभै
ते च पापविजिते विलग्नाधिपे ।। ६ ।। लग्ने क्षीणे शशिनि निधनरंध्रकेंद्रेषु पापैः पापांतस्थे च वि-
धनरिपुव्ययस्थोऽथवा चंद्रे ।। एवं लग्ने भवति मदनच्छिद्रसंस्थैश्च पापैर्मात्रा सार्द्धं यदि न च शु-
भैर्वीक्षितः शक्तिमद्भिः ।। ७ ।। राश्यंतगे सद्भिरवीक्ष्यमाणे चंद्रे त्रिकोणोपगतैश्च पापैः ।। प्राणैः ९
या प्रयात्याशु शिशुर्वियोगमस्ते च पापैस्तुहिनांशुलग्ने ।। ८ ।। अथ भसंधितियस्तो चंद्रे कुजे निधना-
श्रिते जननिसुतयोर्मृत्युर्लग्ने रवौ तु स शस्त्रजः ।। उदयति रवौ शीतांशौ वा त्रिकोणविनाशगे
शी

र्निधनमशुभैर्वीर्योपेतैः शुभैरयुते सिते ९॥ असितरविशशांकभूमिजैर्व्ययनवमोदयनेधना
श्रितैः॥ भवतिमरणमाशुदेहिनां यदि गुरुणा बलिनानवीक्षितां १०॥ सुतमदननवांत्यल
ग्नरंध्रेष्वशुभयुतोमरणाय शीतरश्मिः॥ भृगुसुतशशिपुत्रदेवपूज्यैर्यदिबलिभिर्नयु
तोऽवलोकितो वा॥११॥ योगेस्थानंगतवतिबलिनश्चंद्रे स्वं वा तनुगृहमथवा॥ पापैर्दृष्टे बलव
ति मरणं वर्षस्यांतः किलमुनिगदितं॥१२॥ इति बृहज्जातके रिष्टाध्यायः॥६॥ मययवनम
णित्थशक्तिपूर्वैर्दिवसकरादिषु वत्सराः प्रदिष्टाः॥ नवतिथिविषयाश्विभूतरुद्रदशाः सहि ४
हिता दशभिः स्वतुंगभेषु॥१॥ नीचेऽतोऽर्द्धं ह्रसति हि ततश्चांतरस्थेऽनुपातो होरा त्वंशप्रति
ममपरे राशितुल्यं वदंति॥ हित्वा वक्रं रिपुगृहगतैर्हीयते स्वत्रिभागः सूर्योच्छिन्नद्युतिषु च
दलं प्रोज्झ्य शुक्रार्कपुत्रौ॥२॥ सर्वार्धत्रिचरणपंचषष्ठभागाः क्षीयंते व्ययभवनादसत्सु वामं॥

सचरस्थंदृष्ट्रसतितथैकराशिगा नामेको द्वौ हरति बली तथाह सत्यः ॥३॥ सार्द्धोदितोदितनवां
शहता त्समरसाद्भागाष्टयुक्तशतसंख्यतैपैतिनाशी ॥ क्रूरे विलग्नसहिते विधिनात्वनेन सौम्ये
क्षिते दलमतः प्रचयं प्रयाति ॥४॥ सूर्यापष्टिर्द्विघ्नी १२० मनुजकरिणांपंचचानिशाहया
नां द्वात्रिंशत्खरकरभयोः पंचकं दति ॥ विरूपास्साप्यायुर्वर्षमहिषयोर्द्वादशश्वनः स्मृतं
छागादीनां दशकसहिताः षड्परमं ॥५॥ अनिमिषपरमांशके विलग्नेशशितनयेगविपं
चवर्गलिप्ते ॥ भवतिहिपरमायुषः प्रमाणं यदि सहिताः सकलाश्चतुंगभेषु ॥६॥ आयुर्दायं
विष्णुगुप्तोपिचैवं देवस्वामी सिद्धसेनश्च चक्रे ॥ दोषश्चेषां जायते ष्टावरिष्टं हित्वानायुर्विंशतेः
स्पष्टमायु र चं मं छि ह श्रु श रु योगा स्यादधस्तात् ॥७॥ यस्मिन्योगे पूर्णमायुः प्रदिष्टं तस्मिन्न
१२ ॥७ ७ १५ २१ १६ ९ १२ प्रोक्तं चक्रवर्तित्वमन्यैः ॥ प्रत्यस्सोयीतेष्वदोषोपरो पिठीवंसायुः
००० ६ ६०० ०० ०० ००
०० ६ ५०० ०० ०० ०० ५

चि

१०

१

हित्वाव कर्मिसाद्दिनास्सर्वसंस्कृतिः ४

पूर्णमार्यैर्विनापि ॥८॥ स्वमतेन किलाह जीवशर्मा ग्रहदायं परमायुषः स्वरांशं ॥ ग्रहभुक्त
नवांशराशितुल्यं बहुसाम्यं समुपैति सत्यवाक्यं ॥९॥ सत्योक्ते ग्रहमिष्टं लिप्ती कृत्वा शतद्वयेना
हृते ॥ मंडळभागविशुद्धे ऽब्दाः स्युः शेषात्तु मासाद्याः ॥१०॥ स्वतुंगवक्रोपगतैस्त्रिसंगुणं द्विरु
सत्याचार्य त्तमस्वांशकभत्रिभागगैः ॥ इयान्विशेषस्तु भदंतभाषिते समानमन्यत्प्रथमेप्युदीरितं ॥११॥
किंत्वत्र भांशप्रतिमं ददाति वीर्यान्वितो राशिसमं च होरा ॥ क्रूरोदये योपचयः स नात्र कार्यश्च
नाब्दैः प्रथमोपदिष्टैः ॥१२॥ सत्योपदेशो वरमत्र किंतु कुर्वंत्ययोग्यं बहुवर्गणाभिः ॥ आचार्य
कत्वं तु बहुघ्नतायामेकं तु यद्भूरि तदेव कार्यं ॥१३॥ गुरुशशिसहिते कुळीरलग्ने शशितनये भृगुजे
च केंद्रयाते ॥ भवरिपुसहजोपगैश्च शेषैरमितमिहायुरनुक्रमाद्विना स्यात् ॥१४॥ इति श्रीबृहज्जा

तके आयुर्दायाध्यायः ॥७॥ उदयमीरविशशांकप्राणिकेंद्रादिसंस्थाः प्रथमवयसिमध्येंत्येचददुः
फलानि ॥ नहि नफलविपाकः केंद्रसंस्थाद्यभावे भवति हि फलपक्तिः पूर्वमापोक्लिमेपि ॥१॥ आयुः
कृतं येन हि यत्तदेव कल्प्या दशा सा प्रबलस्य पूर्वा ॥ साम्ये बहूनां बहुवर्षदस्य तेषां च साम्ये प्र
थमोदितस्य ॥२॥ एकर्क्षगोर्द्धमपहृत्य ददाति तु स्वंत्र्यंशं त्रिकोणगृहगः स्मरगः स्मरांशं ॥ पा
दं फलस्य चतुरस्रगतः सहोरास्त्वेवं परस्परगताः परिपाचयंति ॥३॥ स्थानान्यथैतानि सवर्ण
यित्वा सर्वाण्यधःछेदविवर्जितानि ॥ दशाब्दपिंडे गुणको यथांशं छेदस्तदैक्येन दशाप्रभे ११
दः ॥४॥ सम्यग्बलिनः स्वतुंगभागे संपूर्णा बलवर्जितस्य रिक्ता ॥ नीचांशगतस्य शत्रुभागे
ज्ञेयानिष्टफला दशाप्रसूतौ ॥५॥ नष्टस्य तुंगादवरोहिसंज्ञा मध्या भवेत्सा सुहृदुच्चभांशे ॥

आरोहिणी निम्नपरिच्युतस्य नीचारिभागेषु धमाप्रवेत्सा ॥ ६ ॥ नीचारिभागसमवेते स्थिते स्यद्रात्तेय
हे मिश्रफला प्रदिष्टा ॥ स्वांशान्तरूपाणि फलान्यथैषां दृशो सुवक्ष्यामि फलोपयोगं ॥ ७ ॥ उभये
धममध्यपूजिता द्रेक्काणे श्चरभेक्योत्क्रमात ॥ अष्टभेष्टसमाः स्थिरे क्रमाद्धोराद्याः परिक
ल्पितादशा ॥ ८ ॥ एकं द्वौ नव विंशति धृति कृती पंचाशदेषां क्रमा चंद्रारेंदुजशुक्रजीवदिनकृ
द्दैवाकरीणां समाः ॥ स्वैः स्वैः पुष्टफलानि सर्गजनितैः पक्तिर्दशायाः क्रमादंते लग्नदशा शुभेति
यवना नेच्छंति केचित्तथा ॥ ९ ॥ पाकस्वामिनि लग्नगे सुहृदि वा वर्गैस्य सौम्यैपि वा प्रारब्धा शुभदा
दशास्त्रिदशषट्लाभेषु वा पाकपे ॥ मित्रोच्चोपचयत्रिकोणमदने पाकेश्वरस्य स्थितश्चंद्रः सत्फ
लबोधनानि कुरुते पापानि चातोन्यथा ॥ १० ॥ प्रारब्धा हिमगोर्दशोदे स्वगृहगमानार्थसौख्या
वहा कौजे दूषयति स्त्रियं बुधगृहे विद्या सुहृद्वित्तदा ॥ दुर्गारण्यप[illegible]थौयेदषिकपीस्सिहे

ळ

सितसैन्नदा कुस्त्रीदास्रगअंभयोर्लरागर्हेमानार्थसौख्यावहा ॥११॥ सौर्यस्थेनरवदूतचर्म
कनककौर्या धभ्रपार्हवैस्तो दण्डं धैर्यमजस्त्रमुद्यमरतिः ख्यातिः प्रतापोन्नतिः ॥ भार्यापुत्रध
नारिशस्त्रकुतश्रुक्रभ्रपोडुवा व्यापदस्त्यागीपापरतिः स्वाप्तसक्रव्हो ह्लकोडपीडामया ॥१२॥
इंदोः आप्यदशां फलानि लभते मैत्रं द्विजात्युद्भवानी लक्ष्मीर विकारवस्त्रजकुसुमक्रीडारति
र्व्या न्भुश्रमैः ॥ निद्रालस्यमृदुद्विजामररतिः स्त्रीजन्ममेधाविताकीर्त्यैर्यौपचयक्षयौ च बलि
म्निवैरं स्वपसेवा च ॥१३॥ भौमस्यारिविमर्दभूपरसहजक्षित्याधिकौजैर्धनी पद्मेषःस्तुतहा ॥१२॥
मित्रसुहृज्जैर्विद्रुमरुह्वेषिता ॥ त्यल्वास्त्रकुज्वरभंगपित्तजनितारोगाः परस्त्रीरताप्रीतिः
पापरतैरधर्मनिरतिः पारुष्यतैक्ष्ण्यानि च ॥१४॥ बौध्यां दो स्सुहृद्भुरा द्विजधनं विद्वत्प्रसंस्ता
कौंस्यी१८ यशोयुक्तिद्रव्यसुवर्णवेसर महीसौभाग्यसौख्याप्तयः ॥ हास्योपासनकौशल्यमतिश्चयोधर्मक्रियासिद्ध

यः पारुष्यंभ्रमबंधमानसरुजः पीडाच धातुत्रयात् ॥१५॥ जैव्यां मानगुणोदयोमतिचयः कीर्तिः प्रतापोन्नतिर्मा
हात्म्यैर्यमनमंत्रनीतिनृपतिस्वाध्यायमंत्रैर्द्धनं ॥ हेमाश्वात्मजकुंजरांबरचयः प्रीतिश्च सद्भूमिपैः सूक्ष्मोहारग
हनाद्युमः श्रवणरुग्वैरं विधर्माश्रितैः ॥१६॥ शौक्र्यां गीतरतिप्रमोदसुरभिद्रव्यान्नपानां
बरस्त्रीरत्नद्युतिमन्मथोर्थ्वंमंत्रैभोपकरणज्ञानेष्टमित्रागमाः ॥ कौशल्यं क्रयविक्रये कृषिनि
धिप्राप्तिर्धनस्यागमो हृद्दौर्बज्ञानिरीवधर्मरहितैर्वैरंश्रचः स्नेहतः ॥१७॥ सौरीं प्राप्य खरोष्ट्र
पक्षिमहिषीवृद्धांगनावाप्तयः श्रेणीग्रामपुराधिकारजनितापूजाकुधान्यागमः ॥ श्लेष्मेर्ष्यानिलकोपमो
हमलिन। व्यापत्तितंद्राश्रमान्भृत्यापत्यकलत्रभर्त्सनमपिप्राप्नोतिचव्यंगतौ ॥१८॥ दशासु शस्तासु शुभानि
कुर्वंत्यनिष्टास्वशुभानि चैवं ॥ मिश्रासु मिश्राणि दशाफलानि होराफलं लग्नपतेः समा
नं ॥१९॥ [illegible]ध्याये यस्य च द्रव्यतुल्यं कर्माजीवो यस्य यश्चोपदिष्टः ॥ भावस्थानालोक

योगोङ्गवंयत्नात्सर्वे तस्य योज्यं दशायां ॥२०॥ छायां महाभूतकृतां च सर्वेऽभिव्यंजयंतिस्य दशा
मवाप्य ॥ घां घ्वग्निवाय्वंबरजान्गुणाश्च नासास्यदृक्त्वक्श्रवणानुमेयान् ॥२१॥ छाया शुभा
शुभफलानि निवेदयंती लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः ॥ तेजोगुणान्बहिरपि प्रविका
शयंती दीपप्रभास्फटिकरत्नघटस्थितेव ॥२२॥ स्निग्धद्विजत्वङ्नखरोमकेशा छाया सुगंधा
च मही समुत्था ॥ तुष्ट्यर्थलाभाभ्युदयान्करोति धर्मस्य चाहन्यहनि प्रवृद्धिं ॥२३॥ स्निग्धा
सिताच्छहरिता नयनाभिरामा सौभाग्यमार्दवसुखाभ्युदयान्करोति ॥ सर्वार्थसिद्धि
जननी जननीव चाप्या छाया फलं तनुभृतां शुभमादधाति ॥२४॥ चंडाधृष्या पद्महेमाग्नि १३
वर्णायुक्ता तेजोविक्रमैः सप्रतापैः ॥ आग्नेयीति प्राणिनां स्याज्जयाय क्षिप्रं सिद्धिं वांछितार्थस्य धत्ते ॥२५॥

26

मलिनपरुषकृष्णापापगंधानिलोछा जनयति बहुरोगं व्याध्यनर्थार्थनाशान् ॥ स्फटिकसदृशव
र्णाभाग्ययुक्तात्युदारा निधिरिव गगनोछा श्रेयसी स्वछवर्णा ॥२६॥ उक्तफलदशायां तारछावांतरा
सा बहुजनयति पुंसां सौख्यमर्थागमं च ॥ कथितफलविपाकेस्तर्कयेद्वर्त्तमानां परिणमतिफ
लोक्तिः स्वप्नचिंतास्ववीर्यैः ॥२७॥ एकग्रहस्य सदृशे फलयोर्विरोधे नाशं वदेद्यदधिकं परिप
च्यते तत् ॥ नान्यो ग्रहः सदृशमन्यफलं हि नस्तिस्वां स्वां दशामुपगताः स्वफलप्रदाः स्युः ॥२८॥ ध
इति श्रीबृहज्जातके दशापाकाध्यायोष्टमः ॥ ॥ स्यादर्कः प्रथमायबंधुनिधनद्व्याज्ञातपोद्यून
गो १।११।४।८।२।१०।९।७। वक्रात्स्वादिवतद्वदेवरविजाछुक्रात्स्मरांत्यारिगः ७।१२।६। जीवा
द्धर्मसुतायशत्रुषु ९।५।११।६। दशाद्यायारिगः १०।३।११।६। शीतगोस्त्रोध्वांस्ततपः सुतेषु ११०

बृ॰ जा॰

३।११।६।१२।९।५। चबुधाल्लग्नात्सबंधे स्युगः १०।३।११।६।४।१२॥१७॥ लग्नात्षड्द्वित्रिदशाय
गः ६।३।१०।११ स्वधनधीधर्मेषु चाराच्छशी स्यात्सास्त्रादिषु साष्टसप्तसु रवेः षट्त्र्यायधी
स्थोयमारः॥ धीत्र्यायाष्टमकंटकेषु ५।३।११।८।१।४।७।१० शशिजाज्जीवाद्व्ययायाष्टगः १४
केंद्रस्थश्च सितात्तु धर्मसुखधीत्र्यायास्पदानंगगः॥२॥ वक्रात्स्वपचयेष्विनात्सतनये ३।६
द्वि ४ १०।११।५ धीद्याधिके षड्द्यायेश्च ज्ञाद्द्विफखेषु केंद्रनिधनप्राप्त्यर्थगः ।१।४।७।१०।८।११।२।
स्वाच्छुभः॥ धर्माद्याष्टमकेंद्रगो ९।११।८।१।४।७।१०।र्कतनयात्स्वज्ञात्षड्द्विधीस्त्वाभगः ६।३।५।
११। शुक्रात्सद्व्ययलाभमृत्युषु ६।१२।११।८। गुरोः कर्मस्वलाभारिषु १०।१२।११।६॥३॥ धी
द्यायाष्टतपःसुखेषु च स्वजात् २।१।११।८।९।४।३।५। सव्यात्मजे षिडजः साङ्गाङ्गेषु यमारयोर्व्य

घा २

१२ ६ १२ ८ २ ३
यरिकुर्योष्यष्टगो वाक्पते: ।। धर्मायारिसुत व्यये कुज १।११।६।५।१२। सविछु: स्यात्साद्ये कर्मे त्रिग:
षट्स्थाया ष्टसुखवास्पदे कु ६।२।११।८।४।१०। हिमगो: साद्ये कु लग्नाछु भृगु ४।। दिकूस्थाद्यांष्टमदा
यबंधु १०।२।१।८।७।११।४ कुजे जातस्यात्सौत्रि केषष्ठे गिरा: १०।२।१।८।७।११।५।३। स्पूर्योत्सत्रितपस्सु
धी १०।२।१।८।७।११।४।३।९। स्वनवदिक्लाभारिगो ५।२।९।१०।११।६। भार्गवात्।। आयायार्थन
वा सै गु ७।११।२।९।५। हिमगोर्मदात्त्रिषट्धी व्यये ३।८।५।१२। दिग्धीषट्स्वसुखाय पूर्वेनवगो
१०।५।६।२।४।११।१।९।७। ज्ञात्सस्मरस्थोदये १०।५।६।२।४।११।१।९।७।।५।। लग्नादास्तुतलाभ
धनववे सा से शशी कात्सित: स्यात्साङ्गे कुसुखत्रिधीनवदशाछिद्रात्त्रिग: ४।३।५।९।१०
१८।११। सूर्यजात् । धायव्ययगो ८।११।१२ सैवैर्नवदशाप्राप्यषष्ठधीस्थे ९।१०।११।८।५ गुरोर्ज्ञी
२ वै
गु

[illegible]

द्वी आयनवारिगपा३।११।१०।६ हस्त्रिनवषट् ३।९।६ पुत्रागमीत्ये ५।११।१२ कुजात्म॥६॥ मंदः स्वात्रिसुताय
रिःफुगः ५।११।१२।६। शुभः स्वाद्गीत्यगो ३।५।११।९।१०।१२ रक्तमिज्जात्रकेंद्राया ६ धने धिनो ११।८।७
१०।११।८।२।३ उपचये धा द्वेसुरवे चोदयात् ३।६।१०।११।१४॥ धर्मायारिदशांत्यमृत्युषु ९।११।६।८।
१।१०।१२।८ बुधाच्छ्द्धादिषट् ~~[illegible]~~ स्वाष्टगः ३।६।११। षष्ठीत्यायगतः ६।१२।११। सितान्तोः सुर
गुरोः प्राप्य स्वधीरान्ध्रफु॥११।१२।५।८।७॥ इति निगदितमिष्टं नेष्टमन्यद्धि शेषादधिकफलवि
पाकं जन्मभावेत्र दद्युः॥ उपचयगृहमित्रस्वोच्चगैः पुष्टमिष्टं त्वपचयगृहनीचास्तारिगैर्नेष्ट
संपत्॥१०॥ इति अष्टकवर्गाध्यायः॥ अथाखिलः पितृपितृपत्नि मातुलमित्रभ्रातृस्त्रीभृतकजन्माद्दिवा
कराद्यैः॥ होरेंद्वोर्दशमगतैर्विकल्पनीया मेदंकास्पदपतिगौरनाथवृत्या॥१॥ अर्कांशे तृणकनको
र्णान्तेषड्जाद्यैश्च द्वादशोकृशिजलजांगनाश्रयाश्च॥ धातुअग्निप्रहरणसाहसैः कुजांशे सौम्यांशे लिपि

जानकी
राम
१५

30

गणितादिकाव्यशिल्पैः॥२॥जीवांशेद्विजविबुधाकरादिधर्मैः काव्यांशेमणिरजतादिगोमहिष्यैः॥सौ
रांशेश्रमवधभारनीचशिल्पैः कर्मेशाधिपतिनवांशकर्मसिद्धिः॥३॥मित्रारिस्वगृहगतैस्ततस्त
दर्थंतुंगस्थेबलिनिचभास्करेस्ववीर्यात्॥आयस्थैरुदयधनाश्रितैश्चसौम्यैः संचिंत्यंबलसहि
तैरनेकधास्वम्॥४॥ ॥इतिश्रीबृहज्जातकेवराहमिहिरकृतौकर्माजीवोनामदशमोध्यायः॥ ॥प्राहुर्य
हीप५ वनाःस्वतुंगगैःक्रूरैःक्रूरमतिर्मंति॥क्रूरैस्तनजीवशर्मणःपक्षेक्षित्यधिपःप्रजायते॥१॥वक्रार्कजार्कगुरुभिःस
कलैस्त्रिभिर्वास्वोच्चेषुषोडशनृपाःकथितैकलग्ने॥द्व्येकाश्रितेषुचतथैकतमेविलग्नेस्वक्षेत्रगेशशिनि
षोडशभूमिपाःस्युः॥२॥वर्गोत्तमगतेलग्नेचंद्रेवाचंद्रवर्जितैः॥चतुराद्यैर्ग्रहैर्दृष्टैर्नृपाद्वाविंशतिःस्मृ
ताः॥३॥यमेकुंभेर्केजेगविशशिनितैरेवतनुगैर्नृयुक्सिंहालिस्थैःशशिजगुरुवक्रैर्नृपतयः॥यमे
दूतुंगेगेसवितृशशिजौषष्ठभवनेतुलाजेंदुक्षेत्रैःससितकुजजीवैश्चनरपौ॥४॥कुजेतुंगेर्केंदौ

कन्यायां१=

31

धैनुषि यमलग्ने चक्रपतिः पतिर्भूमेश्चान्यः क्षितिसुतविलग्ने सान्द्रान्निनि॥ सचंद्रे सौरे स्ते सुरपतिगुरौ
चापधरगे स्वतुंगस्थे ज्ञाना बुदयमुपयाते क्षितिपतिः॥५॥ वृषे सेंदौ लग्ने सवितृगुरुतीक्ष्णांशुतनयैः सु
हृज्जायाखस्थै र्भवति नियमान्मानवपतिः॥ मृगे मंदे लग्ने सहजरिपुधर्मव्ययगतैः शशांकाद्यैः ख्यातः पृ
थुगुणयशाः पुंगवपतिः॥६॥ हये सेंदौ जीवे मृगमुखगते भूमितनये स्वतुंगस्थौ लग्ने भृगुजशशिजाव
वनृपती॥ सुतस्थो वक्रार्की गुरुशशिसितानाश्वापि हिबुके बुधे कन्यालग्ने भवति हि नृपोन्यो पि गुण
वान्॥७॥ वृषे सेंदौ लग्ने घटमृगमृगेंद्रेषु सहितैर्यमारार्के र्योगः खलु सकलमनुजः शास्ति वसुधां॥ अजे
सारे मूर्तौ शशिगृहगते चामरगुरौ सुरेज्ये वा लग्ने धरणिपतिरन्यो पि गुणवान्॥८॥ कर्किणि लग्ने
तत्स्थे जीवे चंद्रासितज्ञैरायप्राप्तैः॥ मेषगतेऽर्के जातं विंद्याद्विक्रमयुक्तं पृथ्वीनाथं॥९॥ मृगमुखेऽर्कतन
ये तनुसंस्थे त्रियजोलीरहरयोधिपयुक्ताः॥ मिथुनतौलिसहितौ बुधशुक्रौ यदि तदा पृथुयशाः पृथिवीशः॥१०॥ १५

स्वोच्चसंस्थे बुधे लग्ने भृगौ मेषूरणाश्रिते ॥ सजीवेऽस्ते निशानाथे राजा मंदारयोः सुते ॥११॥ अपि खलकुलजाता
मानवा राज्यभाजः किमुत नृपकुलोत्थाः प्रोक्तभूपालयोगैः ॥ नृपतिकुलसमुत्थाः पार्थिवा वक्ष्यमाणैर्भव
ति नृपतितुल्यास्तेषु भूपालपुत्राः ॥१२॥ स्वोच्चस्वत्रिकोणगैर्बलिष्ठैः ख्याद्यैर्भूपतिवंशराजा नरेंद्राः ॥ पंचा
दिभिरन्यवंशजाता हीनैर्वित्तयुता न भूमिपालाः ॥१३॥ लेयस्थे कुजे दोलग्ने गोमे स्वोच्चे ॐ ने मंदे ॥ चा
पप्राप्ते जीवे राज्ञः पुत्रं विंद्यात्पृथ्वीनाथं ॥१४॥ स्वर्क्षे शुक्रे पाताळस्थे धर्मस्थानप्राप्ते चंद्रे ॥ दुश्चिक्यो ग
प्राप्तिप्राप्तेः शेषैर्जातः स्वामी भूमेः ॥१५॥ सौम्ये वीर्ययुते तनुयुक्ते वीर्याढ्ये च शुभे शुभयाते ॥ धर्मार्थोपच
यस्थैश्व शेषैर्धर्मात्मा नृपजः पृथिवीन्द्राः ॥१६॥ वृषोदये मूर्तिधनारिलाभगैः शशांकजीवार्कसुता परैर्नृ
पः ॥ सुखे गुरौ खे शशिनि तीक्ष्णदीधितौ यमोदये लाभगते नृपोपरैः ॥१७॥ मेषूरणाय तनुगाः शशिमंदजी
वाज्ञारो धने सितरवी हिबुके नरेंद्रं ॥ वक्रासितौ शशिसुरेज्य सितार्कसौम्या होरासुखास्तसुतखापि

मनाः प्रजेशैः ॥१८॥ कर्मलग्नयुतपाकदशायां राज्यलब्धिरथवा प्रबलस्य ॥ शत्रुनीचगृहयातदशायां छिद्रसं
श्रयदशा परिकल्प्या ॥१९॥ गुरुसितबुधलग्ने सप्तमस्थेर्कपुत्रे वियति दिवसनाथे भोगिनां जन्म विंद्या
त् ॥ शुभबलयुतकेंद्रैः क्रूरभस्थैश्च पापैर्व्रजति शबरदस्युस्वामितामर्थभाक्च ॥२०॥ ॥इति श्री बृहज्जा
तके राजयोगाध्यायः ॥ ॥नवदिग्वसुवह्निकाग्निवेदैर्गुणिता द्वित्रिचतुर्विकल्पजाः स्युः ॥ यवनैस्त्रिगुणा
हि षट्शती सा कथिता विस्तरतोत्र तत्समासः ॥१॥ रज्जुर्मुसलं नलश्चराद्यैः सत्यस्त्वाश्रयजान् जगाद यो
गान् ॥ केंद्रैः सदसद्युतैर्दलाख्यौ स्रक्सर्पौ कथितौ पराशरेण ॥२॥ योगा व्रजंत्याश्रयजाः समत्वं यवा
ब्जवज्राण्डजगोलकाद्यैः ॥ केंद्रोपगैः प्रोक्तफलौ दलाख्यावित्याहुरन्ये न पृथक्फलौ तौ ॥३॥ आस
न्नकेंद्रभवनद्वयगैर्गदाख्यस्तन्वस्तगैश्च शकटं विहगं च बंधौ ॥ शृंगाटकं नवमपंचमलग्नसं
स्थैर्लग्नान्यगैर्हलमिति प्रवदंति संतः ॥४॥ शकटाण्डजवच्छुभाशुभैर्वज्रं तद्विपरीतगैर्यवः ॥ कमल

३७

तुर्विमिश्रसंस्थितैर्वापीनद्यदि केंद्रबाह्यतः ॥५॥ पूर्वशास्त्रानुसारेणमयावज्रादयस्कृताः ॥ चतुर्थ
भवनेस्त्र्यात्तृसितोभवतः कथ्यं ॥६॥ कंटकादिप्रवृत्तेस्माच्चतुर्गृहगतैर्ग्रहैः ॥ यूपेषुशक्तिदंडाख्या
होराद्यैः कंटकैः क्रमात् ॥७॥ नौकूटछत्रचापानि तद्वत्सप्तर्क्षसंस्थितैः ॥ अर्द्धचंद्रस्तुनावाद्यैः प्रोक्त
स्त्वन्यर्क्षसंस्थितैः ॥८॥ एकांतरगतैरर्थात्समुद्रःषड्गृहाश्रितैः ॥ विलग्नादिस्थितैश्चक्रमित्याकृ
तिसंग्रहः ॥९॥ संख्यायोगाः सप्तसप्तर्क्षसंस्थैरेकापायाद्वल्लकीदामपाशः ॥ केदारः स्याच्छू
लयोगोयुगंचगोलश्चान्यान्पूर्वमुक्तान्विहाय ॥१०॥ ईर्ष्युर्विदेशनिरतोध्वरुचिश्चरज्ज्वांमानीध
नीचमुशलेबहुकृत्यसक्तः ॥ व्यंगः स्थिराढ्यनिपुणोनलजःस्वगुल्मेभोगान्वितोभुजगजोबहु
दुःखभाक्च ॥११॥ आश्रयोक्ताः स्मृताविफलाभवेत्यन्यैर्विमिश्रितैः ॥ मिश्रायैस्तेफलंदद्युराम
श्राः स्वफलप्रदाः ॥१२॥ यत्कार्यभाक्सततमर्थरुचिर्गदायीनह्रीनिकृशाकटजः सरुजः केदार ॥

35

३३॥
१८॥

दूनाटनः कृत्वहेरुद्विहगे प्रहृष्टः शृंगाटके चिरसुखी कृषिकद्धलाख्ये ॥१३॥ वज्रेंत्यपूर्वसुखिनः सुभ
गोतिशूरः शौर्यान्वितस्त्वशुभ यवे सुभगो वयोंते ॥ विख्यातकीर्त्यमितसौख्यगुणश्च पद्मे वाप्यां तनुस्थिर
सुखी निधिकृन्न दाता ॥१४॥ त्यागात्मवान्क्रतुवरैर्यजतेच यूपे हिंस्रोथगुप्त्यधिकृतः शरकृच्छराख्ये ॥ नी
चोऽलसः सुखधनैर्वियुतश्च शक्तौ दंडे प्रियैर्विरहितः पुरुषोंत्यवृत्तिः ॥१५॥ कीर्त्यान्वितश्चलसुखः कृपण
श्च नौजः कूटेऽनृतप्लवनबंधनपश्च जातः ॥ छत्रोद्भवः स्वजनसौख्यकरोंत्यसौख्यः शूरश्च कार्मुकभवः
प्रथमांत्यसौख्यः ॥१६॥ अर्द्धेंदुजः सुभगकांतवपुः प्रधानस्तोयाश्रये नरपतिप्रतिमश्च भोगी ॥ चक्रे
नरेंद्रमुकुटद्युतिरंजितांघ्रिर्वीणोद्भवश्च निपुणः प्रियगीतनृत्यः ॥१७॥ दातान्यकार्यनिरतः पशुपश्च ॥१८
दाम्नि पाशेधनार्जनविशीलसभृत्यबंधुः ॥ केदारजः कृषिकरः सुबहूपयोगः शूरः क्षतोंय

रुचिर्विधनश्च मूर्खः ॥१८॥ धनविरहितः पाखंडी वा युगे त्वथ गोळके विधनमळिनोऽज्ञानोपेतः कुशिल्पलसो
टनः ॥ इति निगदिता योगाः सार्द्धं फलैरिह नाभसा नियतफलदाश्चिंत्या ह्येते समस्तदशास्वपि ॥१९॥ ॥इ
ति नाभसयोगाध्यायः ॥ अधमसमवरिष्ठान्यर्ककेंद्रादिसंस्थे शशिनि विनयवित्तज्ञानधीनैपुणानि ॥ अ
हनि निशि च चंद्रे स्वेधिमित्रांशके वा सुरगुरुसितदृष्टे वित्तवान्स्यात्सुखी च ॥१॥ सौम्यैः स्मरारिनिधने
ष्वधियोग इंदोस्तस्मिंश्चमूपसचिवक्षितिपालजन्म ॥ संपन्नसौख्यविभवा हतशत्रवश्च दीर्घायुषो वि
गतरोगभयाश्च जाताः ॥२॥ हित्वार्कं सुनफानफादुरुधराः स्वांत्योभयस्थैर्ग्रहैः शीतांशोः कथितोऽन्यथा तु
बहुभिः केमद्रुमोऽन्यैस्त्वसौ ॥ केंद्रे शीतकरेऽथवा ग्रहयुते केमद्रुमो नेष्यते केचित्केंद्रनवांशकेष्वपि वदंत्यु
क्तिः प्रसिद्धा न ते ॥३॥ त्रिंशत्सरूपाः ३० सुनफानफाख्याः षष्टित्रयं १८० दौरधुरप्रभेदाः ॥ इच्छाविकल्पैः
क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यनीतिः ॥४॥ स्वयमधिगतवित्तः पार्थिवस्तत्समो वा भवति हि सुनफायां
ती

धी धन ख्यातिमांश्च॥ प्रभुरगदशरीरः शीळवान् ख्यातकीर्त्ति विषयसुखसुवेषो निर्व्वृतश्चानफायां॥४॥
उत्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितो दुरधराप्रभवः सभृत्यः॥ केमद्रुमे मळिनदुःखितनी
चनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि वंशजाताः॥६॥ प्रोत्साहशौर्यधनसाहसवान्महीजः सौम्यः पटुः
सुवचनो निपुणः कळासु॥ जीवोर्थधर्मसुखवान्नृपपूजितश्च कामी भृगुर्बहुधनो विषयोपभोक्ता॥७॥
परविभवपरिच्छदोपभोक्ता रवितनयो बहुकार्यकृद्गणेशः॥ अशुभकृदुडुपोह्नि दृश्यमूर्त्तिर्गळिततनुः

ष

शुभदोन्यथान्यदूह्यं॥८॥ लग्नादतीवसुखवान्वसुमान्शशांकात्सौम्यग्रहैरुपचयोपगतैः समस्तैः॥
द्वाभ्यां समोल्पवसुमांश्च तदूनतायामन्येष्वसत्स्वपि फलेष्विदमुत्कटेन॥९॥ इति श्रीबृहज्जातके चंद्रयो
गाध्यायः॥ ॥तिग्मांशुर्जनयेद्धिमांशुसहितो यंत्राश्मकारं नरं॥ भौमेनाघरतं बुधेन निपुणं धीकीर्त्तिसौ १६
ख्यान्विते॥ क्रूरं वाक्पतिनान्यकार्यनिरतं शुक्रेण रंगायुधैर्लब्धस्वं रविजेन धातुकुशलं भांडप्रकारे

चे ॥१॥ कूटःस्त्र्यासवकुंभपण्यमशिवमातुः सवक्रः शशी सज्ञः प्रस्रतवाक्यमर्थनिपुणं सौभाग्यकीर्त्यान्विती ॥
विक्रांतं कुलमुख्यमस्थिरमतिं वित्तेश्वरं सांगिरा वस्त्राणां स सितः क्रियादिकुशलं सार्किः पुनर्भूसुतं ॥२॥
मूलादिस्नेहकूटैर्व्यवहरति वणिग्बाहुयोद्धा ससौम्ये पुर्यध्यक्षः सजीवे भवति नरपतिः प्राप्तविद्यो द्विजो
वा ॥ गोपो मल्लोथ दक्षः परयुवतिरतो द्यूतकृत्सासुते ज्येदुःखार्त्तोऽसत्यसंधः स सवितृतनये नामजो निंदि
तश्च ॥३॥ सौम्ये रंगचरो बृहस्पतियुते गीतप्रियो नृत्यवान् वाग्मी भूगणपः सितेन मृदुना मायापटुर्लंघकः ॥
